
11116CH11

## नवमः पाठः

# ईशः कुत्रास्ति

प्रस्तुत पाठ नोबेल पुरस्कार विजेता कवीन्द्र रवीन्द्रनाथ टैगोर की विश्वविख्यात कृति **गीताञ्जलि** के संस्कृत अनुवाद से संकलित है। इसमें कवि ने ईश्वर की वास्तविक सत्ता को किसानों, मज़दूरों और गरीबों में दर्शाया है। इसके अनुवादक को. ल. व्यासराय शास्त्री हैं।

**देवागारे पिहितद्वारे**
**तमोवृतेऽस्मिन् भजसे कम् ?**
**त्यज जपमालां त्यज तव गानं**
**नास्त्यत्रेशः स्फुटय दृशम्॥**



**तत्रास्तीशः, कठिनां भूमिं**
**यत्र हि कर्षति लाङ्गलिकः।**
**यत्र च जनपदरथ्याकर्ता**
**प्रस्तरखण्डान् दारयते॥**

© NCERT not to be published

**ईशस्तिष्ठति वर्षातपयो-**
**स्ताभ्यां सार्धं मलिनवपुः।**
**दूरे क्षिप तव शुद्धां शाटी-**
**मेहि स इव पांसुरभूमिम्॥**

**मुक्तिः? क्व नु सा दृश्या मुक्तिः!**
**सलीलमीशः सृजति भुवम्।**
**तिष्ठति चास्मद्धिताभिलाषी**
**सविधेऽस्माकं मिषन् सदा॥**

**ध्वानं हित्वा बहिरेहि त्वं**
**त्यज तव कुसुमं त्यज धूपम्।**
**पश्यंस्तिष्ठ स्वेदजलार्द्र-**
**स्तन्निकटे कार्यक्षेत्रे॥**

**यदि तव वसनं धूसरितं स्यात्**
**यदि च सहस्रच्छिद्रं स्यात्।**
**का वा क्षतिरिह तेन भवेत्ते**
**तत्त्वमिदं चिन्तय चित्ते॥**

© NCERT not to be republished

## शब्दार्थाः टिप्पण्यश्च

| | | |
|---|---|---|
| **देवागारे** | – | देवस्य आगारे, देवमन्दिर में। |
| **पिहितद्वारे** | – | पिहितं द्वारं यस्य तत् तस्मिन्, बन्द दरवाजे वाले (में)। |
| **तमोवृते** | – | तमसावृते, अन्धकार से आच्छादित (में)। |
| **जपमालाम्** | – | जपाय मालाम्, मन्त्रादि के जपने की माला को। |
| **नास्त्यत्रेशः** | – | न + अस्ति + अत्र + ईशः, यहाँ ईश्वर नहीं है। |
| **स्फुटय** | – | खोलो। |
| **दृशम्** | – | दृष्टि (आँखें) को। |
| **तत्रास्तीशः** | – | तत्र+ अस्ति + ईशः, ईश्वर वहाँ है। |

| | | |
|---|---|---|
| **कर्षति** | – | हल चलाता है। |
| **लाङ्गलिकः** | – | हलवाहा। |
| **जनपदरथ्याकर्ता** | – | जनपदस्य रथ्यायाः कर्ता, जनपद की सड़क बनाने वाला। |
| **प्रस्तरखण्डान्** | – | प्रस्तराणां खण्डान्, पत्थरों के टुकड़ों को। |
| **दारयते** | – | तोड़ता है। |
| **ईशस्तिष्ठति** | – | ईशः + तिष्ठति। |
| **वर्षातपयोः** | – | वर्षा च आतपश्च वर्षातपौ तयोः, वर्षा और धूप में। |
| **मलिनवपुः** | – | मलिनं वपुः यस्य सः अर्थात् दीनः, मैलयुक्त शरीर वाला अर्थात् दीन। |
| **शुद्धाम्** | – | साफ़ (स्वच्छ)। |
| **शाटीम्** | – | साड़ी को। |
| **पांसुरभूमिम्** | – | धूलिधूसरित ज़मीन पर। |
| **सलीलम्** | – | लीलया सह, लीला (क्रीडा) के साथ। |
| **चास्मद्धिताभिलाषी** | – | च + अस्मद् + हित + अभिलाषी, अस्माकं हितस्य अभिलाषी, हमारा हित चाहने वाला। |
| **सविधे** | – | समीप में। |
| **मिषन्** | – | देखता हुआ। |
| **बहिरेहि** | – | बहिः एहि, बाहर आओ। |
| **पश्यंस्तिष्ठ** | – | पश्यन् + तिष्ठ, देखते रहो। |
| **स्वेदजलार्द्रः** | – | स्वेदजलेन आर्द्रः, पसीने से लतपथ। |
| **तन्निकटे** | – | तत् + निकटे, उसके समीप में। |
| **कार्यक्षेत्रे** | – | कार्यस्य क्षेत्रे, कार्य करने की जगह पर। |
| **वसनम्** | – | वस्त्र। |
| **सहस्रच्छिद्रम्** | – | सहस्राणि छिद्राणि यस्मिन् तत्, हजारों छिद्रों वाला (फटा-पुराना)। |
| **क्षतिः** | – | हानि। |
| **तत्त्वमिदम्** | – | तत्त्वम् + इदम्, इस तत्त्व को। |
| **चिन्तय** | – | विचार करो। |
| **चित्ते** | – | चित्त में (मन में)। |

© NCERT not to be republished

## अभ्यासः

**1. संस्कृतभाषया उत्तरं दीयताम्।**

(क) ईशः कुत्रास्ति? इति पाठः कस्माद् ग्रन्थात्सङ्कलितः?

(ख) लाङ्गलिकः किं करोति?

(ग) प्रस्तरखण्डान् कः दारयते?

(घ) ईश्वरः काभ्यां सार्द्धं तिष्ठति?

(ङ) कविः जनान् कुत्र गन्तुं प्रेरयति?

(च) कविः किं चिन्तयितुं कथयति?

**2. ''तत्रास्तीशः कठिनां भूमिं .......... दारयते''। इत्यस्य काव्यांशस्य व्याख्या हिन्दीभाषया कर्तव्या।**

**3. रिक्तस्थानानि पूरयत।**

(क) अस्मिन् .......................... कं भजसे।

(ख) स्वेदजलार्द्रः .......................... तिष्ठ।

(ग) ध्यानं हित्वा .......................... एहि।

(घ) यदि तव .......................... धूसरितं स्यात्।

**4. अधोलिखितपदानां वाक्येषु प्रयोगं कुरुत।**

सार्द्धम्, सविधे, हित्वा, एहि, धूसरितम्, भवेत्।

**5. अधोलिखितेषु सन्धिं कुरुत।**

तमोवृते + अस्मिन् = ...................

ईशः + तिष्ठति = ...................

बहिः + एहि = ...................

**6. अधोऽङ्कितेषु सन्धिविच्छेदं कुरुत।**

नास्त्यत्रेशः = ............ + ............

पश्यंस्तिष्ठ = ............ + ............

तन्निकटे = ............ + ............

**7. ईशस्तिष्ठति .......... पांसुरभूमिम्, इत्यस्य श्लोकस्य अन्वयं लिखत।**

## योग्यताविस्तारः

(क) पाठगतस्य आशयस्य स्थिरीकरणाय अधोलिखितसूक्तयः दीयन्ते

मनः क्षोभं न कस्यापि
प्रकुर्वीत कथञ्चन।
आर्तोच्छ्वासैर्हि दीनानां
जगत् सर्वं प्रणश्यति॥1॥

बद्धाञ्जलिपुटा भृत्या
वित्तेशान् समुपासते।
तेभ्यस्तु ते महीयांसः
कुर्वते ये श्रमार्चनम्॥2॥

सम्भरणेन दीनानां
विपदाशु विलीयते।
ह्रियन्तेऽदातृ - वित्तानि
हिंसकेर्दस्युभिर्बलात्॥3॥

दीनं प्रति घृणाभावः
कर्त्तव्यो न कदाचन।
कृपापात्रं स ते भक्तः
पापकर्मा भवन्नपि॥4॥

अशक्तमपि कार्येषु
अशक्तं मावगच्छ माम्।
समर्थ इति मत्वा मां
व्यवहारं कुरुष्व भोः॥5॥

(ख) पाठस्य भावं चेतसि प्रवर्धनाय कानिचित् समभावगीतानि अपि श्राव्यसाधनैः श्रावयितव्यानि।

© NCERT not to be republished